प्रवेश सं० १६२९९ विषयः पुराणेतिहासम् क्रम सं०

नाम नासिकेतोपाख्यानम् ग्रन्थकार

पत्र सं० २, ६-४२

श्लोक सं० अक्षर सं० (पंक्तौ) ३३ पंक्ति सं० (पृष्ठे) ९

आकारः १०.१" × ४.३" लिपिः दे. ना. आधारः कागज.

14456

सं. १८१४

वि० विवरणम् अपूर्णम्

न. १८९१

पी० एस० यू० पा०—७७ एस० सी० ई०—१९५९—५० ०००

Indira Gandhi National Centre for the Arts

सिस्थिता: । कश्चिदासीत्पुरा राजन्नृषि: परमधार्मिक: । उद्दालक इति ख्यातो ब्र
ह्मपुत्रस्तु तापस: । वेदवेदांगतत्वज्ञ: स्मृति सिद्धांत पारग: । दांतो दक्षो मुनिश्रे
ष्ठो महाप्राज्ञो महातपा: । तस्याश्रमं महारम्यं ऋषिभिश्चोपसेवितं । नानाद्रुम
लताकीर्णं नानापुष्पोपशोभितं ॥१॥ हंसकारंडवाकीर्णं चक्रवाकोपलक्षितै
सेव्यमानं मलं फुल्लकमले सरसाकुले । आगतश्चाश्रमे तत्र पिप्पलादो महा
मुनि: अभ्युत्थानं तदा चक्रे तस्य उद्दालको मुनि: अभिवाद्य यथान्यायमास
ने चोपवेश्यतं । स पाद्यार्घ्यं समभ्यर्च्य वचनं चेदमब्रवीत् । किमर्थमागतं वि
प्र वेदवेदविदांवर । पिप्पलादस्तु उवाच । श्रूयतां च महाप्राज्ञं उद्दालक महामु

२ नो दृष्टाश्चैव मया सीर्दीस्तु यमपन्नतपोधनाः । अहो तपो महातीव्रं नियमेनोपसेवि
तं । ऋषयश्चाश्रमे सर्वे सपत्नीकाः सदा स्थिताः । तप्यंते च तपो विप्र सर्वे वंश
धरास्सुताः । वंशोनष्टे मुनिश्रेष्ठ सर्वमेव विनश्यति । पितरो देवताश्चापि त
स्य तुष्टा न कर्हिचित् । मन्यंते पितरो देवो यस्य पुत्रोस्ति शोभनः । कुलानि ता
रयेत्सएव सुपुत्रो वंशवर्धनः । अपुत्रस्य गृहं शून्यं ह्यपुत्रो नागरहेण । किं अपु
त्रो वंशनाशोस्ति श्रुतिरेषा सनातनी ॥ बहुनात्र किमुक्तेन पुत्रो वंशस्य कार
णं । याचस्व पुत्रं राजानं मद्वाक्यं यदि मन्यसे ॥२॥ तस्मात्सर्वप्रयत्नेन क
र्तव्यासंततिस्थिरा । उद्दालक उवाच । षडशीतिसहस्राणि वर्षाणि तपसि स्थितः
पिप्पलादिकृथ्येसोहं प्रवर्ते स्त्रीपरिग्रहे । नरकं च नरवं घोरं गच्छंतीति श्रुतामया ॥

न देवे चैव गांधर्वे नासुरे न च राक्षसे । न पुनर्मानुषे लोके यथोदरमुपस्थितं अ
द्भुतं च समुत्पन्नं पन्नलोकेषु दृश्यते । तस्यास्तु वचनं श्रुत्वा विद्वांस्तम्भयान्वि
ता । तदा तु कन्यकाः श्रुत्वा गत्वा राज्ञी निवेशनं । ततस्तो च नमस्कृत्य चिंतया परया
न्विताः । कृतांजलिपुटा भूत्वा भीताश्चेदवभाषिते । किंचिद्विज्ञापयिष्यामो मातस्त
त्तोभयं यदि । राज्ञ्युवाच । पुष्पा कस्मभयं तं ब्रूतकन्या यथार्थवत् । महाराज्ञी वचः
श्रुत्वा पुनः कन्या वचोब्रुवन् । श्रृणुष्वेदं हि मातस्त्वं अद्भुतं लोमहर्षणं । देवदानव
गंधर्वयक्षराक्षसपन्नगाः ॥४॥ किं पुनर्मानुषैरन्यैरगम्ये पुंसिवर्जिते । वहिः स्थ
राजस्सुभटैरनेकैश्च सुरक्षिते । अंतरं स्वामिराज्ञी त्रीकन्यका मिथ्या सर्वदा । प्र
सादेस्वप्नमेदेवि दुहितानव वर्तते । साच चंद्रवती देवयोगात्सत्वमतो यत्नस्तु

Indira Gandhi National Centre for the Arts

व्यक्तगर्भचिह्नं तत्सर्वमेवावधारितं । एवं कन्यावचः श्रुत्वा रोमहर्षण । अद्भुतं । साराज्ञी
६ दुःखसंतप्ता पातिता भूमिमंडले । व्रापुनातीक्ष्वेन लज्जितवातीव कोमला ।। विकलानष्ट
चित्ताच मूर्छिता भयविह्वला । अपनीपततो मूर्छां प्रपाये अभिविधेस्तदा । तदा तत्पा
र्श्वे सर्वा कन्याः तन्मुखः स्वरवी प्रतिभाजीच राजसदनं गत्वा वचनमब्रवीत् । श्र
णु षेदं महाभाग सर्वशास्त्रविशारद । अभयं देहि मे देव कथयाम्यद्भुतं तव ।।
राजोवाच । ब्रूहि भद्रे यथान्यायमभयं ते ददाम्यहं । इति राजवचः श्रुत्वा राज्ञीव
चनमब्रवीत् । राज्ञ्युवाच । दुहिता चंद्रवत्या तु जाता स्मत्कुलदूषिणी । अद्भुतं देवसं
जातं गर्भस्तस्या बभूव ह । एवं राज्ञीवचः श्रुत्वा राजा क्रोधसमन्वितः । अकरोद्धिम
हदुःखस्तापापे किमिदं कृतं । त्याज्येयं सर्वथा पापा स्थापनीया गृहे न तु । एवं हृदि स

मालोच्य अमात्यान्स आह तापयन्नृपः । महारण्ये चंद्रवतीमेतां स्मत्कुलदूषिणीं । त्यज
ध्वं त्वरितं दूरमविचार्य मदाज्ञया । एवं भूपवचः श्रुत्वा अविचार्य विनिर्गताः ।
रुदंतीमपि तां कन्यां रथमारोप्य ते गिनी । व्यसर्जंत महारण्ये राजशासनतत्पराः ।
तेस्य स्का साचि कुलाती पितृशासनतत्परा । इदमेव ममस्थानं इति नैव निवर्ति
तुं । एकाकिनी वने तस्मिन् सिंहव्याघ्रसमाकुले । भ्रमंती भयसंत्रस्ता कन्या कम
लालोचना । रुदंती तारशब्देन हा विधे किमिदं कृतं । वीक्षंते चादिशः सर्वाः पृथग्भ्र
ष्टा मृगी यथा । एवं च नादनं घोरं जगाम सन्तपन्दिनी ।। ५८ ।। इति श्रीनागकेतो
पाख्याने चंद्रवतीचरिते नाम द्वितीयोध्यायः ।। वैशंपायन उवाच । एवं तस्या
भ्रमंत्यां तु दैवयोगात् महातेजा ऋषिः । कश्चित्तत्र समायातः सत्यधर्मपरायणः ।।

Indira Gandhi National
Centre for the Arts

महारण्ये समित्पुष्पफलमूलकुशेच्छया। ततो विस्मितचित्तोभूत्केयमद्भुतसुंदरी निवर्तमानो ददृशे रुदतीं कन्यकां मुनिः। ततो विस्मितचित्तोभूत्केयमद्भुतसुंदरी॥ किमियं दमयंती किं चित्रलेखाथ तिलोत्तमा। घृताची मेनका वापि किमिहस्था न्यपोत्तमा। यक्षिणी वा किन्नरी वा किराती नागकन्यका। राजकन्याथवा श्रेष्ठा किंचित्कन्या किमीदृशी। राजते च महारण्ये विद्युद्दामसमप्रभा। पादौ कोकनदाकारौ करौ चक्र दिनौ स्तनौ। घने च जघने तस्याः नयने श्रुतिगामिनी॥ नाभिश्च दक्षिणावर्ता त्रिवलीभिरलंकृता। संपूर्णचंद्रवदना मदनांगेव संस्थिता। एवमाश्चर्यसंपन्नां तादृशीं तां द्विजोत्तम। पृच्छा तस्मान्महातेजा करुणापतमानसः। कात्वमत्यद्भुताकारा किं केमायात्र महावने। जाता कस्य कुले बाले कस्य वा पाणिमग्रहीः। इत्ये

त्सर्वं मया चक्ष्व मयानुकंप्यतत्वतः।१८। अहं च तापसः कोपि दयालुस्सर्वजंतुषु।
अस्मिन्महावने भीमे निवसामि फलाशिनः। एवं मुनिवचः श्रुत्वा शोकसागरम
ध्यगा। प्रतप्रश्चैव निःश्वस्य कन्यकेत्यब्रवीन्मुनिं। मुने कथं प्रवक्ष्यामि स्वयं कर्म
विनिंदितं। तथापि पितरं मत्वा त्वां वदिष्याम्यशेषतः। नाहं देवी न गंधर्वी न नागी
न च किंनरी। रघोस्तु कन्यका राज्ञो मुने स्वकुलदूषिणी। अकस्मान्मम संजातो गा
र्भो दुनकरः परः। क्रुद्धेन च तदा पित्रा निक्षिप्ता गहने वने। शोकशल्यातुरा चाहं भ्रमामि
भयपीडिता। एवमुक्त्वा ततः कन्या रुरोद बहुधा पुनः। दृष्ट्वा तां तादृशीं कन्यां ऋषिः का
रुणिकोब्रवीत्। अद्य प्रभृति मे भद्रे दुहिता त्वं न संशयः। ममैव चाश्रमे तिष्ठ त्वाश्वा
स्य बहुधा तदा। गृहीत्वा पिच तां कन्यां ऋषिमाश्रममागतः। तत्राश्रमे तपस्तु तापि

Indira Gandhi National
Centre for the Arts

८

तुर्गृहद्वावसत्। दिने कतिपये तस्या गर्भः स्तोऽभवन्नृप। मासे तु नवमे पुत्रं प्रसूता
सा नृपात्मजा। नासाग्रनिर्गतो यस्मात् नाशके दुस्तदुच्यते।२। एवं योगं समालोक्य
नाम चक्रे ऋषिस्तदा। ततश्चेंद्रवत् पुत्रनाशोऽभूत् तमपालयत्। पापभीता क्षिपन् का-
ले जले तं मा नास्य मे पुनः। एवं पुनः पुनर्भीता विलोपन्नृपात्मजा। वैशंपायन उवा-
च। ततः परम लज्जार्ता वर्द्धमाने दिने दिने। पुत्रं त्यक्तुं मनश्चक्रे स्तोसंवत्सरे नृप।
कारयित्वा मंजूषां च दृढां विवरवर्जितां। वत्स त्वं भाग्यहीनोसि पापात्मा कुलदूष-
कः। त्वं निमित्तं समायासी अवस्थो यमनागसः। आस्तीर्य कोमलां कोरे पल्लवैर्वि-
त्सलाशुभे। तस्यां पुत्रं च संस्थाप्य द्वारं सम्यक् पिधाय च। वेष्टयित्वा प्रयत्नेन गृ-
हीत्वा गतो सुरापगां। तत्र गंगामुखी भर्त्यां वाक्यमेवमभाषत। आजन्म कन्यका

किंचिन्न जानामि हदाप्यहं। गर्भो मम कथं जातो जानात्येतत् दपीश्वरः। येन गर्भः
समुद्भूतो को नजातोसि बालकः। तस्यैव त्वं तमेवाग्र प्राप्तो भव विधेर्वलात्। एव-
मुक्त्वा नृपसुता त्यक्त्वा चमम्भतो सुतं। गंगामध्ये विनिक्षिप्य मंजूषां मंदभागिनी॥
स्नात्वा पुनः पुनर्नत्वा गंगां त्रैलोक्यमातरं।३। समस्तपापसंघातदुस्तरार्णवता-
रिणी॥ आजगाम पुनस्तत्र यत्र कारुणिको मुनिः। वैशंपायन उवाच। ततः प्रवाहे
निक्षिप्ता गंगायां बालकान्विता। मंजूषा तत्र संप्राप्ता यत्रास्त्युद्दालकाश्रमः। तत्र
वेके मुनिश्रेष्ठास्तपस्यन्ति पांडव। केचिद्वेदांस्तथा केचिद्वेदांगान्यपरे पुनः। वेद-
तशास्त्रपरे तत्र प्राभाकरपरे। न्यायं वैशेषिकं चान्ये शब्दशास्त्रमथापरे।
अधीयते नवरत्नपंक्तिं च चतुर्मतं। ध्यायंति च परब्रह्म रागद्वेषविवर्जिताः। तेषां
कुलपतिस्तत्र ऋषिरुद्दालकाभिधः। स्नातुं कदाचिदायातो गंगामध्ये ददर्श सः

Indira Gandhi National Centre for the Arts

९ मंजपा मितिच ज्ञात्वा तामानेतुं मुनि । श्वरः । शिष्यानाज्ञापयामास तेनानीता च सा तदा
ततो विचारणा पाय शीघ्रमाश्रममागतः । समापादे वता यैच पितृकार्यंति थैव च ।
कुत्र हत्वा त्वमजपामुद्दधा द्यातमवक्ष्यच । बालमुद्यदिनकर प्रभामद्भुत दर्शनि
सर्वलक्षणसंपन्नं ध्यानयोगेन संस्थितं । रत्नेन जातमत्यंत मुनिं वस्म पमाग
तः ।४। ध्यानयोगेन च ज्ञात्वा तं स्ववीर्य समुद्भवं । विधेरपि विधोसाक्ष्यामनलं
ध्याममन्यत । तमः तस्मा दाय वचनं चेदमब्रवीत् । निवस त्वं यथा कामं किंच
रस्मिन्ममाश्रमे । ततो गते कियत्काले नाशकेतो मुनेः सुते । तपस्तेपे सुदुर्धर्षे कं
दमूलफलाशनः । कथं यमद्भुता राजन्कथिता जननमे ... य । अन्याम्यापि प्रवक्ष्या
मि सावधानः शृणु सुव्रतां ।४। इति श्री नाशकेतोपाख्याने पितृपुत्रदर्शनो नाम
मतृतीयोध्यायः ।। वैशंपायन उवाच । रघुवंशोद्भवा कन्या रुदंती तदनंतरं । म

शोके तु वियोगार्ता प्रयाता सा च तद्वने । कदाचिद्दैवयोगेन तया दुःखातुरं भृशं । उद्दाल
का श्रमं दृष्टं गंगातीरे शुभे वने । दृष्ट्वा चाश्रमस्तु तं तत्र क्रीडमानं तदाश्रमे । उवाच
वचनं प्रीता वत्स कस्यायमाश्रमः । पितुश्च ते वद किं नाम ... अहं
च पुत्रशोकार्ता पुत्रान्वेषणातत्परा । भ्रमाम्यन्वेषयन्बालं दैवादत्र समागता । मनो
मे दृश्यति तात मा च धृतवदर्शनात् । इति तस्या वचः श्रुत्वा प्रत्युवाच स तां वचः
बालक उवाच । मम भद्रे पिता श्रेष्ठ उद्दालक महामुनिः । आश्रमोयं तस्य पुण्यो मा
नामुनि निषेवितः । फलमूलकुशार्थं प्रयातस्स प्रति वनं । तस्यागमनवेलायां
दानां तु मात्वमर्हसि । इतो गत्वा करिष्यामि अग्निशालानुलेपनं । पात्राणां शोधनं
चापि न तस्यास्ति कुटुंबिनी । इति तस्या वचः श्रुत्वा चंद्रवत्यब्रवीत्सुतं । चंद्रव
त्युवाच । वत्सास्मि तव माता हि पुत्रत्वं च ममागतः । अनुलेपादि सामग्री कथं मे

Indira Gandhi National
Centre for the Arts

पादं प्रेष्यामि इत्युक्त्वा चाग्निशालायां चक्रे ओंकारमुत्तमं। ततः किंचित्समाश्वास्य
९ पुनर्गंगातटं गता। एतस्मिन्नंतरे राजन्नुद्दालकमहामुनिः। संपाद्य होमसामग्री
न्यवर्तत वनाद्गृहे। अग्निशालां समालोक्य शोभमानं विशेषतः। संतुष्टः पुत्र
मालिंग्य वचनं चेदमब्रवीत्। त्वया वत्स कृतं सम्यक् अद्य संमार्जनादिकं। आश्रमे
चाग्निशालायां तुष्टोहं तव भक्तितः। अन्यदा नैव मे कर्तुं यथाद्य कृतवान्भवान्
नाशिकेतुरुवाच। मया नाद्य कृतं तात सर्वं संमार्जनादिकं। मन्मात्रा लेपनं सम्यक् कृतं आ
श्रमे चाग्निमंदिरे। उद्दालक उवाच। माता पुत्र कथं प्राप्ता सांप्रतं कुत्र वा तव। एवं पि
तुर्वचः श्रुत्वा पुत्रो वाक्यमभाषत। इदानीमेव सा माता गंगास्नानार्थमागता। श्रु
त्वैवं मुनिसंहृष्टो मुनिरुद्दालकस्तदा। अग्निहोत्रं देवकार्यं पितृकार्यं तथैव च
समाप्य च कियत्कालं ध्यानयोगेन संस्थितः। ततोब्रवीन्मुनिः पुत्रमानयस्व स्व

मातरं। पुत्रमङ्गले स्वतो पुत्रतो षषस्त यथाविधि। पितुरेव वचः श्रुत्वा प्रयातो यत्र संस्थि
ता। अभिवाद्य यथान्यायमुच्चैर्नामिनयेन सः। नाशिकेतुरुवाच। मातरत्र समागच्छ
मा चेदं कुरु सांप्रतं। आहारं ते प्रदास्यामि तपसेवनतत्परः। अतो मत्पितुरावासो निक
टे तव युज्यते। मातोवाच। अपुत्र भाषसे पुत्र विचित्रं लोमहर्षणं। अधर्मवचनं चे
दं तव पुत्र न शोभते। पिता भ्राता तथा माता मातुलो वा पितामहः। यच्छंति कन्यकामे
तेन पुत्रो मातरं ददौ। पिता पितामहो भ्राता सकुल्यो जननी तथा। कन्याप्रदः पूर्व
नाशे प्रकृतिस्थः परः परः। तथा पितृत्रा। ग्रामियत्र पुत्रतपरिस्थितं। इत्युक्तो देव संयो
गंधितं यतो गताश्रमं। तथागतं सुतं दृष्ट्वा हृष्टोयं मुनिपुंगवः। गत्वासौ पितुरभ्या
संनत्वा वचनमब्रवीत्। आगतो मम माते पिता त्वं मुनिपुंगवः। उद्दालक उवा
च। इयतात कथं माता याता कस्य कुले पुनः। कथं जातो भवान्पुत्र कथं वा सा स

Indira Gandhi National
Centre for the Arts

११

मागता। सर्वमेतदशेषेण पृच्छतामदनुत्तया। त्वत्कृते सततः पित्रा सर्वं पप्रच्छ कौतुकात्। गा
शकेतुवाच। कस्य वंशे समुत्पन्ना कथं चाहं तवात्मजः। ३९। कुत एतागता मद्गेहे
तत्सर्वमादरात्। मातोवाच। शृणु पुत्र महाप्राज्ञ यन्मां त्वं परिपृच्छसि। पूर्वकर्मा
नुसारेण जातमत्यद्भुतं मम। आसीद्रघुरिति ख्यातो राजा त्रैलोक्यविश्रुतः।
तस्याहं कन्यका श्रेष्ठा कदाचिद्विपिने गतः। गंगास्नानार्थमायाता पित्रा सह पास
रीवृता। तत्रैकं कमलं दृष्टं गंगामध्ये कुशेशयं। आनायितं तथा सख्या कौतु
काद्धे करे धृतम्। आघ्रातं च मया वत्स कौतुकाच्च सरोरुहम्। ततो गंगां नमस्कृ
त्य समायाता च मंदिरे। अतीते तु कियत्काले गर्भो मे विस्मयावहः। बभूव स च प
त्यमायातो रघुनाथाय सर्वमेव निवेदयत्। ततः क्रुद्धेन
स्वामिसत्तदारा इत्येनिवेदितः। राज्ञी च रघुनाथाय सर्वमेव निवेदयत्। ततः क्रुद्धेन
रघुणा समादिष्टाश्च किंकराः। सत्वरं त्यज्यतां पापां सुतां मम महावने। निक्षिप्ता

स्तदा रत्नपरात्मा क्रुद्धेनाक्रिं करैः। केनचिन्मुनिना तत्र दृष्टा पुष्पफलार्थिना। कृपालु
ना च नीताहं मत्त्राश्रमं तेन दुःखिता। प्रसूता चाश्रमे तस्य वत्स त्वामिह निश्चितं। ना
सा गेन च संभृतो यतो विधिवज्जातुकर्मणि। ४०। नाशिकेतुरिदं नाम तस्मात् घुष्टं तदा कृ
तेन। मां च पापां च संस्थाप्य तत्र गतः पिता स्ततः। त्वं मया पुनरेव त्वामन्वेष्टुं स्व
गताश्रमे। एतत्सर्वं त्वया प्रोक्तो नाशिकेतो नराधिप। पित्रे निवेदयामास तज्जन्म
नो यथातथं। सुतस्य वचनं श्रुत्वा मुनिर्विस्मयमागतः। प्रजापतेर्वचस्त्यं तदा
स्मरदशेषतः। पुत्रस्यैव वचो रम्यं सत्यं न प्रसस्तव। अतो मया श्रमेषु त्वं चिरं
तिष्ठ त्वं कल्मषाअर्हते रघुराजस्य त्वदर्थं याभि मंदिरं। एवमुक्त्वा ततो वि
प्रो जगाम रघुमंदिरं। द्वारपालेन राजानं कथितं मुनिरागतः। ततः सत्वरमागा
त्य रघुर्द्वारि ददर्श हि स्थितं मुनिवरं भपज्वलंतमिव पावकं। ततो नत्वा स विनय

Indira Gandhi National
Centre for the Arts

१२

निनाय पाद्यं तरं गृहं । आसने चोत्तमे विप्रं निवेश्यार्घं निवेद्य च । प्रदक्षिणां परिक्रम्य उप
विष्टस्तदाज्ञया । मुनिश्चैव सुखासीनो रघुः परमपावनः । अद्य मे सफलं जन्म
अद्य मे सफला क्रिया । अद्य मे सफलं नेत्रं यज्जातं तव दर्शनं । उद्दालक उ
वाच । दृष्टाश्चैव श्रुताश्चैव राजानः पृथिवीतले । न त्वया सदृशो दृष्टो दीर्घा
पूर्णवसुधाम् । गत्वा सहस्राणि हेमकोटिशतानि च । गवां कोटिसहस्राणि
ते याच्यं नृपपुंगव । किं त्वहं प्रार्थये राजन् कन्यामेकां प्रयच्छ मे । प
स्यां संप्रदास्यामि पुत्रं परमधार्मिकं । ५३ । रघुरुवाच । कन्या मम गृहे नास्ति
सर्वं शास्त्रे च जायते । कौतूहलमिदं मन्ये कथय यथार्थतः । उद्दालक उवाच । श्र
णु तालिरिव तं कर्म तेन जाते पूर्वसंचितं । फलं तेन च न संदेहो दुर्निवारं सुरासुरैः । श्रोतव्यं

सर्वमेतत्ते यत्पुरा वृत्तमद्भुतं वंशस्य कारणात् । आगतोहं पञ्च सप्तमः । स च ध्यानपरो राजन् चिरा
त्मां मे दृष्ट्वा तात मत्तं । तत स्वप्रतिपत्त्याहं वचनं चेदमब्रुवम् । दीयतां मे शुभां कन्यां भार्यां पुत्र
विवर्धिनीं । श्रुत्वा तोऽपि च वदमुद्रितं सर्वं पुत्रो भविष्यति । पश्चाद्भार्या भवेत्कन्या रघुवंशस
मुद्भवा । एवमुक्त्वैव राजर्षे ब्रह्मा चान्तरधीयत । ततोहं मामाश्रमं स्वीयं मागमं श्चिंतयान्वि
तः । कथं मे प्रथमं पुत्रो भार्या पश्चात्कथं भवेत् । ततस्तु ध्यानतो रेतः उद्भूतं मम भूतले । तन्मया
पद्ममध्ये तु रेतो निक्षिप्य यत्नतः । ६१ । कुशैश्च वेष्टयित्वा तु गंगायां स्थापितो नृप । ततस्तेन
च कारणे राजन् गंगा स्नानार्थिनी गता । तत्रापि प्रच्छन्नपद्मं गंगामध्यात्समाहृतं । तदा तत्र स्थि
तं वीर्यं नासाग्रेणोदरं गतं । ततस्तस्यां समुद्भूतो गर्भो वीर्यान्ममैव हि । पुत्रश्च नासिकेतास्य नं
राप्य सुषुवे तदा । इदानीं ब्रह्मवचनात् तस्य सा च ममाश्रमे । तिष्ठत्सा महाराज त्वत्रचिंतो मनोगतः । इद
नीं शुद्धचरितां तां कन्यां मे समर्पय विशां पा पन उवाच । ततो विस्मयमापन्नो रघुः स तु पुरं गतः । नि
वेदितं च तत्सर्वं राज्ञा तेन यथा श्रुतं । जातं पङ्क्तं राजन् प्रजापतिनियोजितं । पुनस्त्वागत स्वाप गत्वा सं

Indira Gandhi National
Centre for the Arts

मुनिपुंगवः ।। बहुभक्तिसमायुक्तः प्रहृष्टो मुनिरब्रवीत् ।। रघुरुवाच ।। कन्यादत्ता मया तुभ्यं स्त्वां मे पर
१३ मं वचः ।। रथं परमशोभाढ्यं बंधुभिः परिवारितं ।। आरुह्य तत्र गच्छ त्वं आनयस्व सुतां मम ।। एवमु
क्तो मुनिस्तेन तथैवाश्रममागतः ।। ७ ।। तां मे वरथमारोप्य कन्यकां पुत्रसंयुतां ।। रघुमंदिरमायाता
पुनरेव मुनीश्वरः ।। तदा रथगतं दृष्ट्वा मुनिमंतःपुरस्त्रियः ।। विस्मयं परमं जग्मुः सर्वे च पुरवासि
नः ।। ततस्तस्याः शुभे लग्ने पाणिग्रहमहोत्सवः ।। उद्वाले च स्तनस्ताभ्यां पुत्रराजा रघुर्ददौ ।।
दासीदास्यो धनं धान्यं मौक्तिकाभरणानि च ।। सुवर्णाभरणं तद्वद्रत्नाभरणमेव च ।।
रथागजा हयान्वस्त्रोर्महद्बोधेन वस्त्रं तथा ।। एतत्सर्वं समादाय वस्तु वैवाहिकं न्यपान्नामा
त्रेकस्य पपामास ततो दृष्ट्वाब्रवीन्मुनिः ।। कन्यारत्नं त्वया दत्तं राजन्मम सुदुर्लभं ।।
किमन्यैर्वसुभिः कार्यं वयं यस्मात्तपोधनाः ।। इत्युक्तो मुनिना राजन्नमस्कृत्य स्वबां
धवान्न्य रथेन प्रेषयामास समुनिपत्नीसमन्वितं ।। ततो वैवाहिकेनाथ प्रविष्टः स्वाश्र

मं मुनिः ।। स पुत्रः सकलत्रोसौ राज्ञा दत्तेन तं यथा ।। चंद्रवत्या स्त्रिया सार्द्धमृषिरुद्दा
लकस्ततः ।। नाशिकेतेन पुत्रेण गंगातीरे सुखं स्थितः ।। तेनैव मुनिना राजन्न शापे सं
योजितः सुतः ।। इतिहासकथामेनां पुण्यां पौराणिकीं च ये ।। कथयंति च शृण्वंति पापैर्मु
क्ता भवंति ते ।। ८१ ।। इति श्री नाशिकेतोपाख्याने चंद्रवतीविवाहो नाम चतुर्थोध्यायः
जनमेजय उवाच ।। एतत्पृच्छामि विप्रेंद्र कथयस्व यथातथं ।। नाशिकेतः कथं पुत्रः पित्रा श
पे नियोजितः ।। हेतुना केन च मुने कथं प्राप्नोति दुस्तरां ।। कथं यमपुरीं प्राप्तः स कथं पुन
रागतः ।। कथं स नरकान्सर्वान् दृष्ट्वा माह मुनीन्प्रति ।। एतत्सर्वं समाचक्ष्व परम[illegible]कौतू
हलं ।। वैशंपायन उवाच ।। शृणु राजन्[illegible] यथा क्रुद्धः पिता च तं शापे सुतं योजित
वान्दुस्तारे यमशासने आगतं तेन च यथा तत्सर्वं कथयाम्यहं ।। कदाचिन्मुनिशार्दूलो

Indira Gandhi National Centre for the Arts

२४ नाशिकेतो वचो ब्रूत्वा गच्छ पुत्र वनेशी घ्रस्वसिधो द्य समानय । कुशान् पुष्पफलं चैव
समूलानि विविधानि च । साधनान्यग्निहोत्रस्य मा विलंबं कृथाः कथा । एवं स पि
त्रा प्रोक्तो वनं तत्र मृगाः स्थिताः । तत्र दृष्टं सरस्तेन रम्यं मानससंनिभं । नाना पुष्पफला
कीर्णं लतागुल्मसंकुलं । नाना विहगशोभाढ्यं पद्मोत्पलसमाकुलं । स्नानं कृत्वा ततस्त
त्र विधिदृष्टेन कर्मणा । देवतान् ऋषयश्चापि तर्पितास्तेन शास्त्रतः । देवार्चनं कृतं ना
नापुष्पैर्पि मनोहरैः ।९। नैवेद्यैः फलमूलैश्च मनसा यत्परया तथा । तदा तस्मिन्
न्ने राजन् महाहर्षमुपागमत् । योगदृष्टेन कर्मणा ब्रह्मध्यानं चकार सः । एवं संवत्सरा
ईलुनीतेतेन महात्मना । ततः पितुर्वचः स्मृत्वा समित्पुष्पफलादिकं । होमसाधनमादाय
शीघ्रमाश्रममागतः । चिरागतस्तु नद्दृष्ट्वा पिता क्रोधाद्ब्रवीद्वचः । उद्दालक उवाच । पुत्राद्य

फलमूलानि समानय । नानि किंचित्त्वया । संवत्सरार्धं दुर्बुद्धे त्वग्निहोत्रगतं मम । अग्निहोत्रेण
त्यक्तेन ब्रह्माद्या देवतास्तथा । ऋषयः पितरश्चापि तत्स्य विघ्नं कथं कृतः । पितुस्तद्वचनं
श्रुत्वा प्रत्युवाच सुतस्तदा । नाशिकेतु उवाच । अग्निहोत्रादिकं तात कर्मबंधनमा
त्मनः । जन्ममृत्युजराघोरे संसारे पतनं यतः । योगाभ्यासात्परं नास्ति संसारार्णव
तारणं । ब्रह्माद्या देवतास्सर्वे मुनयस्सनकादयः । सर्वे ते योगमार्गेण सिद्धा । या
तां महामुने । भगवन्स कथं योगः सर्वदानविधायते । उद्दालक उवाच । ऋषयश्च म
होमेनापेचान्ये तपसि स्थिताः । ते सर्वे धर्मे सर्वस्य अग्निहोत्रमुपासते । अग्निहोत्री स
दा स्नातः इत्येषा वैदिकी श्रुतिः । एवं श्रुत्वा विधिवत्स पितुर्वाक्यमब्रवीत् । नाशिकेतु
वाच । अग्निहोत्रफलं नेष्टं पुनरावृत्तिलक्षणं । स्वर्गं भुक्त्वा पुनर्यस्माज्जायते घोर

Indira Gandhi National
Centre for the Arts

२५ संस्थितो। योगात्तु तत्परं स्थानं यतो नावर्तते पुनः। न कुर्यादग्निहोत्रं तं योगमेव सम
माचरेत्। वैशंपायन उवाच। उद्दालकोऽवचः श्रुत्वा सुतस्य। विरतं पुनः।
क्रोधेन महताविष्टो ददौ शापं सुदारुणं। अयुक्तवादी पुत्रस्त्वं दुरात्मा पितृ
दूषकः। गच्छ शीघ्रं यमं पश्य ब्रह्मदंडप्रभावतः। तत्र शापेन नरके घोरे पतितो
घोरतातजे सहस्रे वायवः सर्वे मुनयो भयविह्वलाः। अथोत्तस्थौ योगवता
न्नासिकेतुः पितुर्गिरा। प्रतस्थौ स्वपितुस्तस्य सदनं मुनिपुंगवः। आस्थितं
तं बलं दृष्ट्वा मुनिरुद्दालकस्ततः। महाशोकेन संतप्तो मुनिभिः परिवारितः
हा पुत्र कुपितेन त्वं नाकिमुक्तः पापकारिणा। कथं यमपुरीमार्गं दुर्गमं त्वं ग
मिष्यसि। यत्र वैवस्वतो राजा नरकाय त्रसंस्थितः। यत्र वैतरणी नाम नदी

चैवास्ति दुस्तरा। ३। अग्निज्वालाकुले मार्गे कोपेन व्याकुलीकृतः। पुनः पुनश्च सत्यं तं
नासिकेतुरुवाच तं। पितस्तव वचः सत्यं नासत्यं कर्तुमुत्सहे। सत्येन सूर्यस्तपति सत्येन
वहते मरुत्। सत्येन मेघा वर्षंति सत्येनाग्निर्ज्वलत्यपि। सत्येन सोम शिशिरः सत्येनो
र्व्याप्य धार्यते। सत्येन तिष्ठते आपः सत्येन च धर्मसंस्थितिः। सत्ये प्रतिष्ठिता लोकाः सत्ये
नायुर्भवेन्नृणां। सत्यमेव परं ब्रह्म सत्यमेव परागतिः। नरमेधाश्वमेधाश्च सत्येनेव व
र्तिता। तस्मात्सर्वप्रयत्नेन स्वसत्यं परिपालयेत्। स्वर्गं प्रयाति सत्येन सत्येन परमां ग
तिः। सत्यधर्मविहीनस्य नरके वसतिश्चिरं। तस्मात्सर्वप्रयत्नेन शोकं त्यक्त्वा निरर्थकं। त्याग
धो गरतं तिष्ठ सत्यव्रतपरायण। दृष्ट्वा यमपुरीं तात धर्मराजस्य मंदिरं। त्वरितमिवागमिष्यामि
माकृथा व्याकुलं मनः। नमस्कृत्य स्वपितरं मातरं च निजां सतीं। नासिकेतुस्ततो ध्याने स्थितो भा
तरधीयत। ज्ञानप्रभावात्सत्येन मनोवेगो महान्तपि। परब्रह्मणि लीनो सो शिवमंत्रमनुस्मरन्
संप्राप्तश्चातिवेगेन यत्र राजा स च यमः। दृष्ट्वार्थे धर्मराजानं ज्वलंतमिव हुताशनं। सिंहासनस्थितो

Indira Gandhi National
Centre for the Arts

१६

नेष स्वर्यपुंगतोभास्वता ॥४२॥ इति श्री नाशिकेतोपाख्याने यमलोकदर्शनंनाम पंचमोध्यायः ॥
वैशंपायनउवाच ॥ प्रविश्य मुनिश्रेष्ठो नाशिकेतो निधीरधीः उपविष्टस्सभामध्ये विधिवत्तान
भिपूजिते । धर्मस्तु समारेभे श्रूयतां राजसत्तम । नाशिकेतुवाच । नमस्ते धर्मराजाय नमस्ते लोक
पावन । सर्वेषां सर्वलोकानां नमस्ते सर्वहिताय च । त्वं माता त्वं सुतश्रेष्ठो धर्माधर्मविधारकः । पितृ
परमो नाथः सुरासुरसुपूजितः । नमस्ते बुद्धिवृद्धाय नमस्ते निर्मलाय च । शुभाशुभस्वरूपाय
नमस्तेस्तु प्रतापते । धर्माधिकारितो श्रीमान्नमस्तेनु रूपिणे । नाशिकेतु कृतं स्तोत्रं पुण्यं पापप्रना
शनं । ये पठंति च श्रृण्वंति धर्मराजस्य धर्मिताः । नतेषां जायते व्याधिः मतिर्धर्मे च जायते । यमश्च
तुष्यति तेरां नेक्षते नरकंस्तथा । एवंस्तुत्वा स्तुतिं प्रधर्मराजो वचोब्रवीत् । तोषितोहं त्वया विप्र
श्र्हिकस्मादिहागतः । नाशिकेतुउवाच । कदाचिदग्निहोत्रस्य शिष्यो धर्ममपाकृतः उद्दालकपि
ताक्रुद्धोवाम्बवसान्छशानप । अहं पित्रा ततस्तेन प्रेषितो यमशासने । तेन चोक्तं यमं पश्य तस्य रा
पादिहागतः ॥१॥ यमउवाच । तुष्टोहं ते पुनर्विप्रपुत्रतुर्भ्यं च न पालनात् । वरं ब्रूहि प्रवक्षामि यस्तेम

नसिवर्तते । कालोनाचलवस्मात् निवर्तस्व यथागतं । नाशिकेतुउवाच । यदि तुष्टोसि देवेश वरमे
के प्रयच्छ मे । पश्यामि त्वत्पुरीं सर्वां चित्रगुप्तं च लेखकं । दुष्कृतो यत्र पच्यंते सुरांगनाय च संस्थितः ।
महात्मन्कौतुकं तत्र प्रसादं कुरु स्वयं । एवं वचस्समाकर्ण्य नाशिकेतस्य विस्मितः । धर्म आहू
पयामास किंकरान्सुरतस्थितान् । अयं विप्रो महाप्राज्ञः सत्यधर्मपरायणः । पितृशापादिहायातो
दिदृक्षति पुरीं मम । दर्शयिध्वं मतो दूताः प्रपन्ना मम शासने । श्रुत्वा शुभमयं सर्वं चित्रगुप्तस्य वे
रमलतां मनुराज्ञां सितितां त्वां दूतास्ते रितमागताः । नाशिकेतपुरस्कृत्य चित्रगुप्तस्य वेश्मनि
द्वारपालमिदं प्रोचुर्यमेन प्रेषितो ह्ययं । ब्राह्मणो न समं सर्वमेतद्वक्ते निवेदयन्तु । तेषां तद्वचनं श्रुत्वा
द्वारपालोंतरं गतः । उवाच श्रूयतां देव धर्मेण प्रेषितो द्विजः । साद्दृतो यमदूतैश्च द्वारे तिष्ठति धार्मि
कः । चित्रगुप्तउवाच । प्रतिहार प्रवेशय सर्वे ते द्विजसंयुताः । एवं मदुक्तं वचः प्राप्य द्वारपालो विह
गितः ॥२१॥ आनीतानादिकृतान्सर्वांश्चित्रगुप्तस्य संनिधौ । अथागतान्समावेक्ष्य चित्रगुप्तो व
चोब्रवीत् । किमागताः कथं दूताः किं कार्यं कृतसांप्रतं । दूता ऊचुः । प्रेषितास्मो महाभागधा

Indira Gandhi National
Centre for the Arts

२७

मैराजेन धीमता। श्रूयतां तस्य वाक्यं ते यमवंत प्रतिसुव्रत। एष विप्र महाप्राज्ञः सत्यधर्मपरायणः
पितुः शापेन क्रुद्धस्य प्राप्तो यम महापुरे। त्वया स्यैव छितं कार्यं द्विजस्यानुमताज्ञया। एवं
दूतवचः श्रुत्वा नाशिकेतुमभाषत। प्रजापुरःसरं चैव चित्रगुप्तो हितावरः। ब्रूहि विप्र म
हाभाग किं करिष्याम्यहं तव। नाशिकेतुरुवाच। दृष्टोऽसि भवान्महाभाग सर्वेश्वर्य वि
शारद। यमतुल्यो महातेजा धर्माधर्म विचारकः। त्वं चित्र सर्वलोकानां जानासि चरु
भाशुभं। महावीर्य महाप्राज्ञ ज्ञानसंपन्न नमोऽस्तु ते। वैशंपायन उवाच। एवं च तोषितः स
नाशिकेतुमहात्मना। हर्षं हर्षितवीर्यौ चित्रगुप्तोऽब्रवीद्वचः। ब्रूहि विप्र महाभाग ज्ञा
न चित्रगुप्तं महात्मना। दृष्टो हर्षितवीर्यो वा चित्रगुप्तोऽब्रवीद्वचः। ब्रूहि विप्र महाभाग ज्ञा
नाविज्ञानसंयुतं। २। तुष्टो ददामि ते विप्र ब्रवीषि वरमुत्तमं। यत्ते सर्वं प्सितं कार्यं तन्मे ब्रू
हि सुहृत्तम। नाशिकेतुरुवाच। द्रष्टुमिच्छाम्यहं सर्वां पुरीं दुःखापहारिणीं। आज्ञापय महा
भाग चित्रगुप्त सुमव्रत। तां समाज्ञापय मत्कृपया कुरु षानुधर्म विभो। इमां च विप्र मां संदर्श
यतु महापुरीं। स्वर्गं च नरकं चैव पुण्यपापफलं तथा। चित्रगुप्तआज्ञया दूतैर्नीतो सौ मुनिपुंगवः

दर्शयित्वा निखिलां पुरीं। द
दर्शयित्वा निखिलं सर्वं स्वर्गं नरकमेव च। समानीतस्ततो दूतैर्दर्शयित्वा निखिलां पुरीं। द
र्शयित्वा निखिलं सर्वं स्वर्गं नरकमेव च। समानीतस्ततो दूतैर्दर्शयित्वा विप्रं दृष्ट्वा। नीयतामेष विप्रेंद्र य
तरुचुः। अशेषं दर्शितं देव विप्रस्य भवता तथा। चित्रगुप्त उवाच। नीयतामेष विप्रेंद्रः य
मराजस्य मंदिरं। तमानीतं ततो दृष्ट्वा नाशिकेतुं महोत्तमं। अर्घ्यासनादिकं कृत्वा मान
यित्वा तपोधनं। सुखासीनं स्थितं विप्रं यमो वचनमब्रवीत्। नाशिकेतो महर्षे त्वं सुखे
त्वे यमिहागतः। दृष्टश्च सकलो लोकश्चित्रगुप्तस्य जेरवकः। नाशिकेतुरुवाच। त्वत्प्रसाद
न्मया दृष्टं विषमं नरकं तथा। पितरं दुःखसंतप्तं पुत्रन्महच्छोकमोहितं। यथा तत्पादकमलं प
स्यामि कुरु चानतया। यमउवाच। गच्छ गच्छ द्विजश्रेष्ठ यत्रोतिष्ठति ते पिता अङ्गरस्थाम
स्थापि कुरु चात्तया। यमउवाच। गच्छ गच्छ द्विजश्रेष्ठ यत्रोतिष्ठति ते पिता। अज्ञानादिह। वैशंपायन उवाच।
रक्षापि सर्वदोष विवर्जितः। भगवान् पश्चाद्विप्रेंद्र तपोयोगबलादिह। वैशंपायन उवाच।
एवमुक्तस्तु धर्मेण नाशिकेतो यमांतिकात्। येन मार्गेण तु गतस्तेनैवागात्स्वमाश्रमं
पत्रे व्यस्ते पिता दुःखसंतप्तस्तत्र सत्वरं। मातापिता च पुत्रवात्सल्यात् दुःखितौ तनमेजया। नाम्ना

Indira Gandhi National
Centre for the Arts

चंद्रवती पुत्रया पतिशुश्रूषणे रता ॥ ततः प्रणम्य पितरौ सपुत्रः पुरतः स्थितः ॥ उद्दालकश्च पु
त्रयात्मा पुत्रं दृष्ट्वा समागतं ॥ प्रहर्षं परमं प्राप्य वचनं चेदमब्रवीत् ॥ अद्य मे सफलं जन्म
अद्य मे सफला क्रियाः ॥ अद्य मे सफला पूजा यज्जातं पुत्रदर्शनं ॥ अहं क्रोधी दुराचारो
निर्भर्त्सिता पापकर्मणा ॥ विनापराधेन मया यमपाशे नियोजितः ॥ पुत्र त्वं मम प्रभावोपि
पुत्रस्यास्य महत्तरः ॥ येन वैवस्वतपुरात्त्वं पुनश्च समागतः ॥ तपोयोगबलं चास्य ना
शिकेतस्य न कश्चित ॥ श्रुतं नैव च दृष्टं मे यदातो यमांतिकं ततः ॥ पप्रच्छ च पिता पु
त्रं यमशासनमादरात् ॥ कथं यमपुरी प्राप्ता कथं शीघ्रमिहागतः ॥ कीदृशास्तत्र पंथा
श्च यमश्चैव च कीदृशः ॥ के च तत्र त्वया दृष्टास्तस्य धर्माधिकारिणः ॥ एतत्सर्वं समाच
क्ष्व नाशिकेत त्वरान्वितः ॥ नाशिकेत उवाच ॥ त्वत्प्रसादादहं तात सुखं प्राप्तो यमालयं
यमश्च मया दृष्टो देवाश्च विविधा मया ॥ चित्रगुप्तस्तथा दृष्टः सर्वलोकैकशासनः ॥ काल
श्चैव कृतांतश्च यमदूता महाबलाः ॥ स्थानानि च विचित्राणि शुभाशुभमयानि च ॥ तत्रा

तं मया धर्मज्योतिभिस्तोषितोऽत्र शं ॥ धर्मराजेन तुष्टेन प्रेषितस्तव संनिधौ ॥ आदराद्वरं दत्तं मसरा
मरतामम ॥ ५७ ॥ इति श्री नाशिकेतोपाख्याने पितापुत्रसंवादो नाम षष्ठोऽध्यायः ॥ वैशंपायन उवाच ॥
एवं श्रुत्वा तु ऋषयस्ते विस्मयमागताः ॥ यमस्य भवनं गत्वा नाशिकेत इहागतः ॥ नाशिकेत
मिदं सर्वं प्रष्टुं विस्मितचेतसः ॥ आगतास्ते तत्र शीघ्रं उद्दालकतपोवने ॥ अन्ये च बहवो राजन्नु
षिप्रामासोपवासिनः ॥ पक्षोपवासिनस्सर्वे ये चान्ये जलवासिनः ॥ पंचाग्निसाधकाश्चान्ये उ
र्ध्वपाद धृतास्तथा ॥ अधोमुखास्थिताश्चान्ये आदित्याभिमुखाः परे ॥ प्राणायामपराः ए
वायुभक्षणतत्पराः ॥ निराहारतपोनिष्ठाः शुष्कपर्णाशिनस्तथा ॥ एकपादेन तप्यंति तपः परमदारुणं ॥ भो
स्कारसेवका नित्यं महातेजसमन्विता ॥ अग्निव्रतधराश्चान्ये ह्यग्निहोत्रपरायणाः ॥ योगाभ्यासपरा
श्चान्ये ब्रह्मचर्यपराः परे ॥ पाराककृच्छ्रनिरताश्चांद्रायणपरायणाः ॥ आगतास्त्वरं सर्वे नाशिकेतस्य
पृच्छकाः ॥ ततः सर्वे समासीनाः मधुपर्केण पूजिताः ॥ नाशिकेतं महात्मानं पप्रच्छुरिदमादरात् ॥ अप
यदूचुः ॥ उद्दालकात्मज प्राज्ञ नाशिकेताद्भुतं महत् ॥ यत्त्वया धर्मराजस्य पुरतोऽत्र समागतो ॥ १ ॥

Indira Gandhi National Centre for the Arts

१९ इदानीं ऋषयः सर्वे कश्यपाद्या महर्षयः ॥ श्रुति ॥ श्रुतं कथं यदि वा दृष्टं यमलोके तथा वद । कुत्र स्तत्र गतं किं
वा किंच प्राप्तवरं परं । कीदृशो यमलोकस्य पंथा अपि सकीदृशः । यमस्य कीदृशं रूपं कार्यं तस्य
चकीदृश । कीदृशास्तस्य दूताः कालपाशश्च कीदृशः । कीदृशास्तत्र चारः का स्थिति श्चा
द्वितीये नमा । कीदृशाश्चैव लोकोश्च क्रोधावा प्रियवादिनः । कीदृशा धार्मिकास्तत्र तपो दानै
क साधनाः । कथं तेऽकालपाशाश्च यमदूता स्मुदुराः । स्वर्गाश्च विविधाकाराः कथं वा न
रकाः पुनः । कथं पृष्टास्त्वया तत्र ऋषयः पूर्वयोगिनः । दानानि चाम सदाधारव्रतानि विविधा
नि च । ब्रह्महत्यादिनामानि पातकानि सहस्रशः । कृत्यान्येव तु कर्माणि लभ्यते तत्र बाक
थं । सत्यं ब्रूहि यथा तथ्यं पृच्छा । मकेऋषयावयं । एते सर्वे महाभागा यास्यामि यमशासनं । संसा
रार्णवभीतो श्च कालश्च न शोस्थिताः । नाशिकेतु उवाच । श्रोतव्यं तु ऋषयस्सर्वे येचान्ये तपसि
स्थिताः । नमस्कृत्य महात्मानं धर्मराजं महाद्युतिं ॥ रा ॥ दृष्टं यत्तत्प्रवक्ष्यामि रोमहर्षणमद्भुतं ॥ पि
शापाद्दहं तत्र गतो यत्र यमस्स्वयं । स्तुतिं मिस्तो पितो धर्मो नमस्कृत्य कृतांजलिः । दृष्टस्तेनोदरौ

धर्मासन्न चार्हीं सुतमः । लब्धवर मया तत्र विनया दिष्टचेतसा । अजरामरतां नाम व्याधिवर्जेन मे
र्धर्मासत्यार्ही मुत्तमः । लब्धवर मयानाविनया दिष्टचेतसा । सहस्र योजनं तावदस्ति धर्मपुरं शुभं । तन्मध्ये
वच आगतो नाहमास्तसो धर्मेणानुग्रहात्मकः । सहस्रयोजनं तावदस्ति धर्मपुरं शुभं । तन्मध्ये
गंधिहाया मसुखित पंचयोजनैः । पुरांतेऽपि च चतुर्द्वारं चतुःपथसमान्वितं । नानाजनसमाकीर्ण
नानारत्नोपशोभितं । शोभितं विविधाकारैः प्रत्येकश्चाद्भुतदर्शनैः । वादित्रैर्वादितैस्सम्यक्रूपरमा
तं दक्षिणे । द्वारं तु दक्षिणे घोरं दुर्दर्शनरकान्वितं । तत्र मध्ये धर्मसभा भातिमासुरविग्रहा । तत्र
सभ्या महात्मानः ऋषयो योगिनस्तथा । देवाश्चादिव्यरूपाद्याः । सिद्धाः साध्याः सयक्षकाः । अ
प्सरोगणागंधर्वविद्याधरमहोरगाः । एवं रूपं पुरं तत्र प्रवेशं मो निबोधत । पूर्वद्वारे प्रवेश्येत शिव
भक्तपरायणाः । द्वाः । ग्रीष्मे जलप्रदातारो माघेवह्निप्रदायकाः । विश्रामयंति ये श्रान्तान्नरनिपार्
श्रांतेन पीडितान्नरान् । आगतेस्वागतपराः आगतेचद्दस्वथ । स्नानध्यानपराने ये क्रोधलोभविव
र्जिताः । मातापित्रोः परं भक्त्या गुरुपूजारतास्तथा । अतिथीन्पूजये यस्तु देवद्विजपरास्तथा ।
ब्रह्मविद्याश्च ये मत्या तीर्थस्नानरतास्तथा । प्रव्रज्यानिरताश्चान्ये अनाशकमृतास्तथा ॥

२०

वाराणसीगोगतेषु प्रयागादौ मृताः परे । प्रविशन्त्युत्तरे द्वारि ते ब्राह्मणपुंगवाः । सत्यवादे व
निरताः सदा धर्मपरायणाः । परापवादव्यावृत्ताः परस्त्रीषु नपुंसकाः । एतेषु पश्चिमद्वारे
प्रविशन्ति सुखान्विताः । दिव्यविमानमारुह्य दिव्यभोगसमन्विताः । पुण्यद्वाराख्याय
स्वर्गे दृश्यन्ते धार्मिका जनाः । इदानीं दक्षिणद्वारविस्तारं मा निबोध मे । दुरात्मानो दुरा
चारा दुःशीला रौद्रकर्मिणः । असत्यवादिनो नित्यं गुरुदेवाग्निदूषकाः । पुराणवेद
मीमांसाधर्मशास्त्रीकदूषकाः । मातापित्रोश्च ये निंदां कुर्वन्त्यन्यायिनोपि च ॥४०॥
एतेषां दक्षिणद्वारप्रवेशः पापकर्मिणां । कथयामि यथाहं वः शृणुतं तु द्विजसत्तमाः ॥
बाकुरूपमत्युग्रं घोरं यत्पापकर्मिणां । कृष्णाञ्जनसमाकारा दुष्कृता घोररूपिणः । हाहा
कारकराः पापा दृष्टास्तत्र सहस्रशः । ऋक्षैर्व्याघ्रैस्तथा सिंहैः गृध्रैश्चापि महावज्रैः ॥
मुद्गरैस्ताड्यमानाश्च लोहदंडैश्च दारुणैः । प्रविशन्ति महादुष्टा महानरकसागरे ॥
एवं हि दक्षिणद्वारं महारौद्रं प्रवर्तते । तत्र ये नरका दृष्टा महान्तो लोमहर्षणाः । तानहं सं

प्रवक्ष्यामि शृण्वन्तु द्विजसत्तमाः । कथयन्नप्यहं भीतो भवामि महदद्भुतं । कुंभीपाको महा
घोरो महारौरवरौरवौ । दुःखकारी महज्ज्वालो महारौद्रः सुदारुणः । विलोचनान्तको
खड्गो निरुच्छ्वासो महावरः । असिपत्रवनं नाम आतंदीपस्तथैव च । पूयपूर्णा नदी त
त्रसाकारा कृमिपूरिता । विष्टापूर्णो महाकूपः कर्णनासाविकर्तना । महद्भ्राष्टमह
रौद्रं तप्ततैलं तथैव च । महातप्तो महाशीतः कृमिसंकुलमेव च । ५ । पर्वतारोहणान्नो
मशिलारोहणमेव च । सतप्तवालुकाकुंभनेत्रोत्पाटनमेव च । तीक्ष्णातुंडमहाग्रक्षं
महावायसमेव च । एते चान्ये च बहवो नरकाः सत्यनेषकशः । सिंहऋक्षैर्महारौद्रैः सिं
हगर्जितदुस्सहैः । एषु पापान्विता लोकाः पात्यन्ते यमकिंकरैः ॥५३॥ इति श्रीनासिके
तोपाख्याने नरकवर्णनं नाम सप्तमोध्यायः ॥ ऋषय ऊचुः । नासिकेतु महाप्राज्ञ
तोपाख्यानेन नरकवर्णनं... त्वया दृष्टाश्च तत्र पापाः सहस्रशः । ब्रह्मघ्नो महा
नरकास्त्वत्प्रसादतः । श्रुतास्सर्वे यथा दृष्टाश्च तत्र पापाः सहस्रशः ।

Indira Gandhi National
Centre for the Arts

२१ मित्रत्यागी च शस्त्राग्निघातकाः। मातृघ्नाश्च सुहृद्घ्नाश्च पुत्रघ्ना गर्भघातिनः। विश्वास-
घातिनश्चान्ये बालवृद्धातिघातकाः। परदोषप्रवक्तारस्तथैव गुरुतल्पगाः। स्वामिना-
घातकाद्दृष्टा नरा दुःखेन पीडिताः। ब्रह्मभंगकराः पापा दत्तादत्तापहारकाः। परदाररता
ये च परद्रव्याभिलाषिणः। स्वब्रह्मलोपपरित्यागी साधुवृत्तान्त्यजेत्क्रियाः। स्वारंगघा-
तागीते न विषदो द्रोहिकस्तथा। कूटसाक्षीप्रदातारः कूटकर्मकराश्च ये। अन्यस्मिन्दुःखि-
ते हृष्टा हृष्टे दुःखं भजंति ये। राज्ञां च निंदका नित्यं पतिधर्मस्य निंदकाः। सर्वदा व्यसनासक्ता
अन्यचित्ताश्च सेवकाः। पापेषु चरता नित्यं सत्यशौचविवर्जिताः। सूचकाः खलयाचेव
ये कुवृत्त्युपजीविकाः। महतां महतां चैव देवद्व्यापहारकः। छेदको घोमहावृक्षांक्षेत्रम-
र्यादया स्थितं। दयाहीना दुराचारा दुष्टसंगतिकारकाः। नश्शु तेच गुरोर्वाक्यं शास्त्रवा-
तां तथैव च। एते चान्ये च बहवो नरकेषु वसंति हि ॥२१॥ इति श्रीनाशिकेतोपाख्या-

ने नरकवर्त्तनं नाम अष्टमोऽध्यायः ॥ नाशिकेतुरुवाच। यमलोकस्थितिंश्चान्यां
प्रवक्ष्यामि महद्भुतं। धर्मराजो महाप्राज्ञ प्राणिनां तु गतायुषां। यमलोकं समानेतुं
मा जा पयति किंकरान्। ते पि दूतास्तदाज्ञप्ता बलात्कारेण तानिहशं। समानयंति भो। वै-
वस्वत मलोके यमांतिकं। ततो विचार्यते तस्य शुभाशुभमयं कृतं। एतेन त्रमहाप्राज्ञास-
भायां मासते द्विजाः। कृष्णद्वैपायनो नाम मार्कंडेयो महातपाः। भरद्वाजो दिधीति-
श्च संवर्तो गौतमस्तथा। दुर्वासश्च महातेजा मरीचिर्भृगुरंगिरा। सनत्कुमार
कश्चैव पुलस्त्यः क्रतुरेव च। भासुरश्च पराशरश्च याज्ञवल्क्यो महामुनिः। विश्वा-
मित्रश्च मांडव्यो हारीतमित्रस्तथापरः। योगेशो मुनिमुत्रश्च महाप्रभुस्तथापरः।
एते चान्ये च बहवो धर्माधर्मविचारकाः। द्वादशादित्यसंकाशा वेदवेदांगपारगाः।
मीमांसान्याय शास्त्रज्ञा धर्मशास्त्रैकवेदिनः। चित्रगुप्तस्य वचनाद्वधार्यशु-

Indira Gandhi National Centre for the Arts

२१

मशुभं । प्राणिनां तत्र संस्थानं कर्मजापिमदार्जितं । तेसर्वे धर्मशास्त्राणि समालोक्यैव वाक्यतः । १० ॥
ततः कर्मानुसारेण प्राणिनां स्वर्गनारके । उदाहरंति ते सर्वे धर्मराजागतस्तदा । ततो धर्मो मह
प्राज्ञो धर्माधर्मविचारकः । मुकुटेन विचित्रेण सदा भूषितमस्तकः । द्वादशादित्यसंकाशो म
तिकुंडलमंडितः । दंडहस्तो महाकायो महिषासनसंस्थितः । यथा सभ्योदिते स्वर्गं भोगार्थं ध
र्मकामतां । आज्ञापयति दूतान्मानितो भ्यसुखं वृजात् । पापिनो नरके नेतुं दूतांश्चात्यंतदा
रुणान् । तादृशो यमदूतास्ते निर्दयाः पापकर्मिणः । यमदंडे महाभीमैस्ताडयंति भृशं तदा । कि
मवद्भिरिदं पापाः कर्म पापमनुष्ठितं । कुंभीपाकादिषु ततो नरकेषु क्षिपंति तान् । एवं धर्मस
भामध्ये द्विजादृष्टं मयाद्भुतं । इदानीं संप्रवक्ष्यामि विशेषान्नरकस्थितिः । येन पापेन पापा
त्मा नरयं यांति तादृशं । तत्र तावत्सभामध्ये चित्रगुप्तात्यथाचरात् । ते दूताः पापिनस्तास्ता
न्नयंते यमसंनिधौ । कथयंतीच भोस्वामिन् ब्रह्मघ्नोयं सुदारुणः । इति दूतवचश्श्रुत्वा यमो २२
वदति तान्प्रति । ब्रह्मघ्नोयं सुशास्त्रोक्त्या कुंभीपाके प्रपच्यतां । एवं द्विजवरो येन क्रोधे ॥

हन्यते क्षणात् । यमाज्ञामिति संप्राप्य दूतैर्दंडेन पीडिताः । नीयते ब्रह्महा तत्र कुंभीपाके
सुदुस्सहे । अपरश्च महापापदृष्टस्त्वं तु मुनयो द्रुतं । गोघ्नाश्च पापिनस्त्रे वा विचित्रे रौरवे म
हं । स्त्रीघाती गर्भघाती च ते नयंते पापीजाते । गुरुस्वामिहतायेन छिद्यते क्षुरधारया ।
विश्वासघातकाये च कालसूत्रे विशंति ते । बालवृद्धापघाती च तैलपाकेषु पच्यते । क्षेत्र
दारापहारी च सीतमंजनकारकाः । गुडपाकेषु पच्यंते छिद्यमानास्तु चक्रकैः । अगम्या
गमनायेच ह्यभक्ष्यं भक्षयंति ये । ते पापास्तु दुराचाराः पीड्यंते क्रकचैरपि । चौर्यं पिशु
नीयकं चित्परद्रोष्टिनिरर्थकं । अपेयपानिनो ये च घ्नन्ताः परदूषकाः । नीयंते ते दुराचा
रा दूतैस्थानं भयंकरं । एकाक्षरप्रदातारं यो गुरुं नैव मन्यते । स याति नरकं घोरं यस्मान्ना
याति कश्चित्र । वस्त्रापहारा दुष्टात्मा तां म्रकास्या पहारकः । ऊ । कन्याप्रदाने स्फटात्मा
यस्तु वित्तं समाचरेत् । रौरवे च महाघोरे नरके पच्यते चिरं । दाने चेद्दीयमाने तु यस्तु विघ्न

Indira Gandhi National Centre for the Arts

समाचरेत् ।प्राणिनो ब्रह्मचर्यादि तपोभंगं तु कारयेत्॥ सत्वं ध्यानावलोयस्तु भाषणेन
तिदारुणः ।विघ्नं करोति योन्यस्तु पुनः कारयते च यः ।स्वामिश्चाप वृत्ति भक्ष्य क्षिप्यते यो सिप
त्रके ।दीनश्चाघातितो येन मित्रो वा मरणं चेतसा ।नीयते दारुणो दूतै रंगारेषु समानवाः ।गु
रुद्रव्यापहारी च क्षिप्यते वह्निसंकुले ।राजा यस्यापमरणं तमो पुत्रो पुत्रोन्नवेदसः
पोन्यासमन्यथा कृते करपत्रेस्मिन् छिद्यते ।अदृष्टार्थमवस्कारी नेत्रोत्पाटनभाजनाः
अश्रुते श्रावयेमोन्यं कर्णच्छेदं च संतिच ।अस्नाता भुंजते ये च विनाचरवनंक्रियां ।
विष्टारूपे स्थिसारं वे यावदाहूतसंप्लवं ।ये नरा ब्रह्मदेवस्वं लोभमूढा हरंति हि ।सू
चीमुखे महाघोरे पच्यंते ते दुरासदे ।परदाराभिलाषी च देवब्राह्मणदूषकः ॥ दूषयेद्
मिशास्त्राणि तीर्थानि च न मन्यते ।४०।स्वलेबारो भिमनेशी ग्रंथेभिः काकैश्च भक्ष्यते ।
चिरभुक्त्वा तु यम्नारं ।मिष्टं प्राणप्रियां शुभां ।त्यक्ता सोपि दुराचारः करपत्रेण पाट्य

ते ।एवं तु बहवो दृष्टा मया सत्त्वापि पापिनः ।श्रृंखलाबद्धचरणा यमस्याग्रे व्यवस्थिताः ।त
तो दूतैश्च नरके पात्यमाना यमाज्ञया ।दृष्टश्च मुनयो नेके धर्माधर्मविचारकाः ।चित्रगु
प्तो महाप्राज्ञस्तत्र काञ्चनकोटिमान् ।लिखत्यनुदिनं तत्र प्राणिनां कर्मसंस्थिति ॥४५॥
।इति श्री नाशिकेतोपाख्याने नरकविशेषो नाम नवमोध्यायः ॥नाशिकेतुरुवाच
अपरं च मया दृष्टं रोमहर्षणमुत्तमं ।श्रृण्वन्तु ऋषयस्सर्वे वक्ष्याम्यहमशेषतः ।ब
चित्रं मया दृष्टा भस्मितामामयी पुरा ।अधस्तस्या महानग्निर्ज्वलत्यविरतं बुधाः
तेन दंदह्यमानास्ते प्रलयाग्निरिवस्थिता ।सर्वदा तत्र दह्यंते विरूपाः पापकर्मिणः ।
ऊर्ध्वकेशा महाकायाः तीक्ष्णदंष्ट्रा भयावहाः ।सुतीक्ष्णनखरा रोमाणः सूचीवल्लोमाः स
दुस्स्वराः ।श्रृंखलाभिर्दृढं बद्धा आनीता यमकिंकरैः ।यमदंडैस्ताडितास्ते पतंति च पु

Indira Gandhi National Centre for the Arts

नः पुनः । धावंते । तस्तनश्चापि विध्यंते च पुनर्दृढं । तत्र मध्ये तु या नारी सौसंभोजो हमयो
२४ महान् । ज्वालामालापरिवृतो दारुणोऽस्ति तपश्चिनः । यमदूतैस्तत्सामीप्ये नीयंते परदा
रिकाः । उच्यंते च वचश्चेदं दारुणं तत्र तान् प्रति । रे रे पापा स्मकामस्य परस्त्रीलंपटा सदा
दा । एषा सा परयोषाभ समानीता भवत्कृते । आलिंग्यतां यथापूर्वं संभोगं दुनमा
नसैः । इदमेव फलं सर्वं मर्जितं पूर्वकर्मणा । इत्युक्त्वा यमदूतैस्ते यथा स्तंभं तथा वि
धिं । नालिंगंति तदा बध्वा लाड्यंते दंडमुद्गरैः । बहुधा क्लिश्यमाना स्तु तत्र स्तंभं सु
दारुणं । नालिंगंति स्वकं कर्म स्मरंतः परदारिकाः । मधुमांसरता ये च ह्यभक्षस्य
भक्षकाः । तैलं तेषां मुखे ब्रह्मपानेन दहति किंकराः । ते पीत्वा तैलमत्युष्णं छिन्नतालि प
पातिहि । प्रार्थयंते ततः छायादीनार्त्तस्वेन पीडिताः । तदा नयंति तान्दूतास्तानसिपत्रवनां
तरे । पतंति ताभिः पत्राणि तीक्ष्णान्यसिमयानि च । ते छिन्नगात्रास्ते पापा धावंति विल

